# দক্ষিণামূর্তিস্তোত্রং সূতসংহিতা

{॥ দক্ষিণামূর্তিস্তোত্রং সূতসংহিতা ॥}

প্রলংবিতজটাবদ্ধং চন্দ্ররেখাবতংসকম্ ।

নীলগ্রীবং শরচ্চন্দ্রিকাভির্বিরাজিতম্ ॥ ১॥

গোক্ষীরধবলাকারং চন্দ্রবিংবসমাননম্ ।

সুস্মিতং সুপ্রসন্নং চ স্বাত্মতত্ত্বৈকসংস্থিতম্ ॥ ২॥

গঙ্গাধরং শিবং শান্তং লসৎকেয়ূরমণ্ডিতম্ ।

সর্বাভরণসংযুক্তং সর্বলক্ষণসংযুতম্ ॥ ৩॥

বীরাসনে সমাসীনং বেদযজ্ঞোপবীতিনম্ ।

ভস্মধারাভিরামং তং নাগাভরণভূষিতম্ ॥ ৪॥

ব্যাঘ্রচর্মাম্বরং শুদ্ধং যোগপট্টাবৃতং শুভম্ ।

সর্বেষাং প্রাণিনামাত্মজ্ঞাপস্মারপৃষ্টতঃ ॥ ৫॥

বিন্যস্তচরণং সম্যগ্ জ্ঞানমুদ্রাধরং হরম্ ।

সর্ববিজ্ঞানরত্নানং কোশভূতং সুপুস্তকম্ ॥ ৬॥

দধানং সর্বতত্ত্বাক্ষমালিকাং কুণ্ডিকামপি ।

স্বাত্মভূতপরানন্দপরশক্ত্যর্ধ বিগ্রহম্ ॥ ৭॥

ধর্মরূপবৃষোপেতং ধার্মিকৈর্বেদপারগৈঃ ।

মুনিভিস্সংঋতং মাযাবটমূলাশ্রিতং শুভম্ ॥ ৮॥

ঈশানং সর্ববিদ্যানামীশ্বরেশ্বরমব্যযম্ ।

উৎপত্ত্যাদিবিনির্মুক্তং ওঙ্কারকমলাসনম্ ॥ ৯॥

স্বাত্মবিদ্যাপ্রদানেন সদা সংসারমোচকম্ ।

রুদ্রং পরমকারুণ্যাৎসর্বপ্রাণিহিতে রতম্ ॥ ১০॥

উপাসকানাং সর্বেষামভীষ্টসকলপ্রদম্ ।

দক্ষিণামূর্তিদেবাখ্যং জগৎস্বর্গাদিকারণম্ ॥ ১১।

সমাগত্য মহাভক্ত্যা দণ্ডবৎপৃথিবীতলে ।

প্রণম্য বহুশো দেবং সমারাধ্য যথা বলম্ ॥ ১২॥

রুদ্র যত্তে মুখং তেন দক্ষিণং পাহি মামিতি ।

উক্ত্বা পুনঃ পুনর্দেবং পূজযামাস ভক্তিতঃ ॥ ১৩॥

॥ ইতি সূতসংহিতান্তর্গতম্ দক্ষিণামূর্তিস্তোত্রম্ ॥

Encoded by Venkata sriram P, venkatasriramp at yahoo.in

Proofread by Sunder Hattangadi

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dakshinamurthy Stotram ( Version 3 ) ( from SuthaSamhita ) Lyrics in Bengali PDF
% File name : dakShiNAmUrtistotraSutasamhita.itx
% Location : doc_shiva
% Language : Sanskrit
% Subject : hinduism
% Transliterated by : Venkata sriram P venkatasriramp at yahoo.in
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Latest update : July 4, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website